# FOREWORD.

The discovery of the work.

The name of Bhoja is familiar as that of a great author who wrote on various subjects. Especially he was reputed as an authority of poetics. Until recently his only work on Poetics available to scholars was the **Sarasvatikanthabharana**. This work is notable for its profuse quotations from previous authors whose opinions are condensed and criticised. The minute analysis of its subject-matter accompanied by apt quotations mark out this work from the rest. But scholars had always recognised that the Sarasvatikanthabharana was not the only work of Bhoja on Poetics and that he had written a more voluminous and exhaustive work. That the name of this work was "**Śringaraprakasa**" was also known. But the work was lost to the world until recently. The announcement of the discovery of the manuscripts of many rare and forgotten works in the search conducted by the Madras Oriental Library party and its discovery of many forgotten and almost forgotten works in Malabar raised suddenly the hopes of scholars about the discovery of other similar works. In the course of his enquiry for such works **His Holiness Sri Yatirajasvami** of Mysore came across a small fragment of this voluminous work from a different quarter. Almost simultaneous with this the report of the peripatetic party of the Government Oriental Manuscripts Library, 1919, announced the discovery of a complete manuscript of this long-lost work. This work was only one of the many invaluable works then discovered. His Holiness immediately went to Madras to study the manuscript and if possible to publish it. But when he approached the Library he found that the rules that guided the working of the Library were such that he could not get at the manuscript, even the portion of it, a copy of which he had with him and which he had begun printing. He immediately began a course of correspondence with the Government and requested that in the interests of Scholarship the unnecessarily stringent rules that were till then governing the working of the Library might be modified. The Government readily granted his wish and all the books within the four walls of the Library were thrown open to any scholar for copying or

publication. In the meanwhile His Holiness was able to secure from several notable scholars in Malabar further portions of the work. With the aid of these manuscripts he has set about publishing the entire book of which the portion that is now issued is the first instalment. It is to be regretted that in spite of all these manuscripts there are still considerable lacunae in the work. Again all these manuscripts seem to have been several portions copied by different individuals at different times from the same original. Consequently the defects in one manuscript are copied in the others and the task of publishing and editing is not in the least rendered easier. Considering the great importance of the work for Sanskrit Scholars, it is proposed to issue the book as far as it has been discovered in the form it is now available. It is not unlikely that better manuscripts of the work might be discovered in the future that would serve to clear all the difficulties in the present manuscripts and fill up the lacunae. The present edition is offered now tentatively to acquaint the scholarly world with the great importance of the Śringaraprakasa with a request to all owners of manuscript treasures specially in Malabar to find out if there are not among their possessions other manuscripts of the book. If fortunately such manuscripts are discovered the further portions of the book will not be subject to the same defects which are unavoidably found in the present part.

Difficulties in the publication.

A short account of the subject-matter of all the chapters (Prakasas) of this voluminous work is given in the Sanskrit introduction which would immediately show its importance and the places are noted where the manuscript is defective. Most of the verses that are quoted as examples are given without indicating their sources. A considerable number of these have been traced to their sources: but hundreds yet remain and even the names of the works whence they are extracted are not known. Again among the works whose names are given there are many which are not extant at present. It is not unlikely that many verses which are not at present traceable might have been taken from several of the works that are mentioned by name in the work but are not available

Several extracts from this work throw valuable light on various points of literary history and clear longstanding doubts. A few of these are noticed here. In the eighth Prakasa there is a valuable anecdote about **Kalidasa, Vikramaditya** and a **King of Kuntala**. According to this, Kalidasa appears in the Court of *Vikramaditya* as reporting to the latter how a feudatory of his (*Vikramaditya*), the king of Kuntalas was spending his days. The verse that is reported as having been given by *Kalidasa* in reply

Date of Kalidasa.

shows that the king of the *Kuntalas* was a subordinate or feudatory of *Vikramaditya* and was enjoying very great favour at his hands and that *Kalidasa* was for a time an envoy or ambassador at the Kuntala King's Court and was enjoying as such very great respect. From this anecdote coupled with another recorded in *Kshemendra's Auchityavicharacharcha*, *Kalidasa* appears to have written a book called **Kuntalesvaradautya** or "*Embassy to the Court of the Kuntala* King" where he appears to have given some autobiographical hints. This coupled with the fact that **Pravarasena**, the author of the **Setubandha** was called **Kuntalesa** in literature and the tradition that *Kalidasa* helped *Pravarasena* in writing the *Setubandha* finally fix the dates of *Kalidasa* and *Pravarasena* and add much to our knowledge of the literary history of the period.

Bhasa.

Again, a small incident found in the "**Svapnavasavadatta**" published as Bhasa's at Trivandrum, the Samudragrihavrittanta is also found quoted as from Svapnavasavadatta in the twelfth Prakasa thus establishing that that drama is Bhasa's work or at any rate an abridgement of the latter.

Sanskrit anthologists have references to a Poetess called **Vikatanitamba** although nothing is so far known about her life or work. Bhoja giving a verse long current as recording her praise says that she was a *Punarbhu*, a widow that had married again. This adds a very interesting social detail about an authoress whose name still lives on in Sanskrit Literature although her works appear to have been lost.

Prakrit quotations.

Among the verses quoted as illustrations in the present work a very considerable proportion are in *Prakrit*. At present there are available to the student only a few Prakrit works like the **Gathasaptasati** and the **Setubandha**. All the verses in the present work that could be traced to the available Prakrit poems have been located. But by far the larger portion yet remain and there is no hope of finding out their sources as long as the number of ancient Prakrit works available continue what it is. Bhoja even appears to prefer quotations from Prakrit works to those from Sanskrit. But unfortunately he has not given the names of the works or authors he is quoting from. It only shows that Prakrit works were very popular at that period. More than that it appears that the habit of writing Kavyas in Prakrit was more popular than in Sanskrit. Most of this literature appears to be irretrievably lost.

Gathasaptasati.

In this connection a short notice of the Prakrit anthology of the Andhra king **Hala Satavahana**, the **Gathasaptasati** may not be out of place. It is curious that although

this work is called the *Saptasati* or "The Seven hundreds", no two manuscripts of the work give the same verses. Thus if all the separate verses given in the several recensions of the work are added together, the total number of the verses comes to more than two thousands although the manuscripts contain only seven hundred in each case. The names of the authors of many of these works are given. But all the authors with the exception of one or two are completely unknown to the modern student. A comprehensive and critical edition of the work would greatly add to the knowledge of the Prakrit literature possessed by the modern student. Such a critical edition of the Gathasaptasati is being prepared by His Holiness the Yatirajasvami, and it is needless to express here that the edition would be a monumental one considering his wide learning and experience. Famous Prakrit works like the Brihatkatha of Gunadhya and the Lilavati noticed in various places in literature, but are now lost, seem to have been still extant in the time of Bhoja.

It now remains to determine the age when Bhoja lived. Although many other Indian Sovereigns devoted their time and leisure to the pursuit of literature and produced works and thus made themselves immortal yet there appear to have been very few who can be compared to Bhoja. The number of works on the various subjects that appear under the name of Bhoja are not a few. And they cover over a wide range of subjects. Bhoja, the author of all these works was a king of the Paramara dynasty that had its capital at Dhara in Malva. A number of inscriptions of several members of the family to which Bhoja belonged have been published. From these his date has been fixed.

Date of Bhoja.

He was the son of Sindhuraja and nephew of Munja Vakpatiraja. His uncle Munja had a very long War with the Chalukya sovereign Tailapa and was at length captured by his enemy and put to an ignominous death. Bilhana, the Court Poet of the Chalukya Vikramaditya VII and the author of Vikramankadevacharita says in his work that he was a contemporary of Bhoja whom he might have visited had he liked. Similarly Albiruni, the famous Persian Historian mentions Bhoja as a contemporary. From all these it becomes plain that the period of his literary activity extended roughly over the first half of the 11th century.

His father Sindhuraja and his uncle Munja were both men of letters and patrons of poets. Their own literary activities and patronage attracted a large number of literary men round them. Works like the Dasarupaka, by Dhanika and Dhananjaya produced in his uncle's Court should have paved the way in due course for the Sarasvati-

kanthabharana and the Sringaraprakasa. The minute analysis of the subject-matter and the selections of hundreds of quotations, to illustrate fine shades of emotion as is done in the Sringaraprakasa should have been the work of quite a large number of scholars, all working under the direction of a president who in the present case happens to be none else than the cultured Sovereign.

Of this voluminous work the portion now presented to the public extends over the Prakasas 22 to 24 dealing with Anuragasthapana, Vipralambhasambhogaprakasa and Vipralambha. The peculiarities of these chapters are not dealt with in this short preface. It is proposed to reserve it for a full discussion of the contents of the whole work when the publication is complete.

Before closing these remarks a few words about the publisher His Holiness Sri Yatirajasvamin of Melkote, may not be out of place. Scholars would be interested to know that he is the same as **Pandit A. Anantacharya** formerly of the Mysore Archaeological Department, the author of the illuminating dissertation on *Bhamaha* and the discoverer of the first copy of the *Svapnavasavadatta*. His articles in Sanskrit on Bhasa have already been available to scholars. Since writing the above he has given up the life of a Grihasta and becoming a Sanyasin has become the head of the Yatiraja Mutt of Mysore, established originally by Sri Ramanuja. In addition to the multifarious activities in the new sphere as a Sanyasin he has found time for the study and publication of these works. If proper response comes forward to take advantage of these, he hopes to make this edition of the Sringaraprakasa, the first of a series of Sanskrit publications with permanent subscribers.

A. RANGASWAMI SARASVATI,
*Assistant, Archæological Department,*
*Madras (Epigraphy).*

TRIPLICANE, MADRAS,
1st *June*, 1926.

॥ श्रीः ॥

## ॥ प्रस्तावना ॥

---

इदमावेद्यते सहृदयेषु विद्वत्तमेषु, यथा योऽयमत्र इदम्प्रथमतया संमुद्र्य प्रकाशितः शृङ्गारप्रकाशनामा प्रबन्धः, सोऽसौ प्रवाह इव गङ्गाया हिमवतः, प्रसार इव ज्योत्स्नाया-श्चन्द्रमसः, उद्गार इव परिमललहर्या बकुलवलयस्य, उन्मेषः प्रतिभाया महाराजाधिराज-श्रीभोजदेवस्य ।

यस्यास्याविर्जननात् वर्षोवर्षशत्या एकद्वित्रिक्रमेण सम्प्रति नवता प्रवर्तते, प्रत्यूष इव आयत्यां महितदशतायां समेधमानायामपि सैवाभिनवता समुन्मीलतीति [illegible] प्रकाशसम्पत्तिः ।

## ॥ प्रशंसा ॥

अतीतेऽपि सहस्रकल्पे वर्षकदम्बके अनेन प्रकाशेन सत्कृतलोचना द्विजाः पण्डिता वा वस्तुदर्शिनः प्रबन्धार आमर्शिनि मुख्यालोकः प्रत्यूषः, येनोपलभ्यमानासु साहित्यावलीषु कतिषु द्वित्राश्चैव लवशोऽस्यानुसन्धानसुरभिता वाचो दृश्यन्ते, अथाप्यामूलचूडं प्रबन्धस्य संवेदनं सर्वतो विद्वांसस्तनमेव, कश्चिच्छृङ्गारप्रकाश इति नाममात्रोपलम्भात् विप्रतिपद्यमाना विद्वांसः अद्य च भोजराजीयत्वावगत्या किमपि महत्त्वमनुसन्धाय इतिकर्तव्यताशून्येन प्रत्युत दिदृक्षाविक्षिप्यमाणेन चेतसा आन्दोल्यन्ते । अलमनेन. पदवाक्यप्रमाणरूपाणां शब्दार्थ-विच्छित्तीनां, उत्कर्षापकर्षकाणां गुणालङ्कारादीनां, संविधानविपरिणामादीनां रूपकाणां, जीवित-कल्पस्य रसस्य च अन्यैरनुन्मीलितपूर्वं स्वरूपं मथयन् निरूपयन्तमिमं प्रबन्धं गृहीत्वा पूर्वैर्निखातं सुवर्णनिधिमिव अनिन्द्राना उपर्युपरि सञ्चरन्तोऽपि अन्धा इवैतावन्तं कालमभवन् कवयः केऽपीति न पर्याप्तेयं वाचोयुक्तिः ।

अयं तु प्रबन्धो महाराजेन [illegible] निर्मितोऽपि न केवलं तस्मिन् प्राकृत लिखितोऽपि [illegible] मण्डले नाम्नाप्यस्म गमितः ।

## ॥ ग्रन्थोपलम्भस्थानम् ॥

तदेवं सुदूरनिगूहितरत्नस्येव महोदधेः तिरोहितमुक्तिसूक्तेर्भारतस्य वेलायां विन्ध्य-[illegible]

भवबन्धमेदुरवचोऽस्याकरणखनेः लोपामुद्राजानेर्महामुनेरगस्त्यस्य सन्ततसन्निधानेन समेध-मानायामाम्नायां सरलेषु केरलेषु जात्यन्धस्येव विश्वरूपग्रहणपाटवं, नष्टश्रुतेरिव दिव्यसङ्गीतश्रव-णपारणं, नित्यदुर्गतस्येव महानिधिलाभं, इमं शृङ्गारप्रकाशसमुद्द्योतं स्वानुकूलवर्तिनो जनस्य दूरदर्शितामाकलयति भगवती रत्नगर्भा भूतधात्री। को वा न स्पृहयति सचेताः चन्द्रस्य, चन्दनस्य, मन्दानिलस्य, मल्लिकापरिमलस्य, कलकण्ठकलालापस्य, मुक्ताकलापस्य, मृद्वीकामसृणरसस्य, मुग्धाङ्गनापाङ्गभङ्गस्य च समायोगमिवापादयन्त्या अस्याः कृतेः समालोकनाय, समाचर्वणाय, समाश्लेषणाय, समाघ्राणनाय, समाकर्णनाय, समामज्जनाय, समास्वादनाय, अन्ततः स्वात्मार्पणाय।

## ॥ ग्रन्थलाभादानन्दः ॥

सम्प्रतीमं प्रबन्धमस्मान् लम्भयन्त्या भारतभागधेयभाविताबतारया भगवत्या सरस्वत्या किमिव नोपकृतम्, चक्षुरेव समुन्मीलितमनेन प्रकाशेन, सुप्रभाता च निशा, अनुरक्तं मित्रमण्डलमभ्युज्जिहानं समुद्वीक्षामहे।

एवमिवमुपलब्धापि कृतिः कालपरिवर्तनतः पुरुषपरिवर्तनतश्च छिन्ना भिन्ना त्रुटिता अन्यामन्यामपि दशां प्रापिता दृश्यते। एवमस्या अशलेशोऽपि अभिनववसन्तावतारकन्दलित-माकन्दपल्लवोल्लसत्कलकण्ठीकलरवच्छेद इव, मन्दमन्दवलमानमलयपवमानाचान्तकन्दुकक्रीडा-तान्तकान्ताकपोलस्वेदलव इव, अभिसरणप्रवृत्तनितम्बिनीपादविकीर्णलाक्षारसबिन्दुरिव, विमर्द-विकचविलासिनीकेशपाशच्युतविपर्यस्तकुसुममुकुल इव, निर्दयाश्लेषादलिततुङ्गस्तनीहारयष्टि-मुक्तामणिरिव, मन्मथोन्मादितमत्ताङ्गनापाङ्गविमुद्रितभङ्ग इव, आर्द्रव्यलीकप्रियाधिक्षेपप्रवृत्त-भामिनीभ्रूभङ्गस्फुरितविप्रुडिव, विरहवेदनातरलितमनूदरीगद्गदनादत्रुटिरिव, कावेरीकल्लोल-वेल्लितवेल्लापुण्ड्रेक्षुयष्टिखण्ड इव, परां काष्ठां प्रमोदस्यादधाति सहृदयहृदयानाम्॥

## ॥ ग्रन्थसम्पादनप्रयत्नः ॥

इतः पूर्वं द्वाविंशतेर्वत्सरेभ्यः कस्मिंश्चिद्ग्रन्थे परिशील्यमाने भोजराजकृतस्य रस-स्वरूपनिरूपकस्य शृङ्गारप्रकाशनाम्नः प्रबन्धस्य नामानुवादो व्यलोकि। ततस्तत्सम्पादनाय बहुधा बहुधा कृतेऽपि प्रयतने मद्रास् नगरस्थापितराजकीयसंस्कृतप्राचीनप्रबन्धभाण्डागारस्थ पुस्तकनामावल्यामविचारितनिर्वर्शितानि "शृङ्गारप्रकाश" इति नामाक्षराण्यदृश्यन्त। विचित्र विमर्शे विहिते महानिधिप्रलम्भोऽनुभूतः। यतः केन चिद्विद्वानाग्रियेणापशब्दबहुलमसम्यार्थप्रका-शकं भग्नच्छन्दः पदषट्क जघन्यावयवमिव देवमार्गनाम्ना तेनक्षरे कृताख्यानमवेक्ष्यत। अनेन व्यतिकरेण सुदूरमुत्क्षिप्य पातितमिव हृदयमभूयत। रसवतीषु विदग्धानां च गोष्ठीषु वार्तास्वपि न क्वापि तस्यैतस्य प्रबन्धस्य सद्भावमपि समुन्मीलयन् वाचामाचारोऽभूवत।

गते च बहुतिथे काले विचार्यमाणेषु शास्त्रान्तरनिरूपकेषु तेनैव राज्ञा निर्मितेषु प्रबन्धेषु सर्वेष्वेवानुबन्धानुसन्धानात् अन्तरान्तरा समुपजायमानापि प्रस्तुतग्रन्थस्मृतिर्निरालम्बनतया तत्तत्कार्यं व्यलीयत ।

अस्मिन्नेवान्तरे कर्णाटमण्डले मैसूर् राज्योपभोग्ये कावेरीं सरितमुत्तरेण कोशाग्र-कान्तःपातिनो यादवगिरेराधित्यकायां भगवता रामानुजेन साक्षात्प्रतिष्ठापिते मठेऽधिकृतः सम्पत्कुमारपदाभिख्यो रामानुजोपाह्वो मुनिः तीर्थयात्राप्रसङ्गेन प्रोषितः मार्गगत्या पूर्वसमुद्र-वेलायां प्रतिष्ठितं (मद्रास्) चम्पकवनोपशल्यभूतं कैरविणीसरसीमपि भगवतः पार्थसारथे-र्दिव्यायतनेन परिशोभितं तिरुवल्लिकेणीति प्रतीतं वृन्दारण्यक्षेत्रं कांश्चिन्मासानध्यतिष्ठत् । तत्रात्र उपतिष्ठमाने विदुषां समवाये प्रस्तूयमाने प्राचीनग्रन्थान्वेषणादिप्रस्तावे एकः सहृदयः कुतश्चित् केरलीयमातृकातः प्रतिरूपितं प्रस्तुतशृङ्गारप्रकाशस्य कं चन भागमुपढौकयति स्म, यत्र च प्रतिपत्रं ग्रन्थपातः उदाहरणपद्यानामादितो द्वित्राण्येवाक्षराणि, कश्चिदन्त्यपादमात्रं, असंस्तुतमातृकाक्षरतया अपरिशिष्टानि विपर्यस्तानि अन्यान्यान्यक्षराणि अपदसंबद्धानि संबाध-दुस्स्थानि च, प्राकृतगाथादीनां व्यतिशोचनीया दशा, कश्चिद्ग्रन्थस्य परिपाट्येव विपर्यस्ता अनन्विता च, स्तोभाक्षरबहुला लेखनसरणी, इति । तथापि तदेव मातृकां परिकल्प्य महता-श्रमेण प्रत्यादर्शः साधितः । अदृष्टश्रुतचरस्य महीयसः प्रबन्धस्य लाभेन पर्युत्सुका हृदयालवो रसिकाः संशोध्य मुद्रणाय सोपग्रहं अभ्यार्थयन्त ।

## ॥ मातृकान्तरसंवादविप्रलंभः ॥

अस्मिन्नेवावसरे प्रस्तावितपूर्वस्य मद्रास् राजकीयभाण्डागारस्य नातिचिरसम्पादिते केरलदेशगतो ग्रन्थसमूहे तस्यैतस्य शृङ्गारप्रकाशस्य प्रत्यन्तरसद्भावः कर्णपथाध्वनीनतामभजत । इतः पूर्वमेव बहुकृत्वो विनयप्रयत्ना विद्वांसोऽनितरसाध्यं भाण्डागारस्थकोशावलोकनं प्रति-पादयन्तः प्रस्तुतमठास्थानमाध्यं निश्चिन्वानास्समचूचुदन् । एवंविधाभिरतिमात्राभिः पण्डितानामुत्कलिकाभिर्बलात्कृतान्मठाद्ग्रन्थसंवाददानाय नियमलेखमुखेन भाण्डागाराध्यक्षः पर्यनुयुज्यत । स तु महामनाः सर्वामपि भाण्डागारस्थितिं स्वमाम्नायधामानुग्रहं वा लेखेनैवं प्रत्याचष्ट; यथा—"संवादायापि नानुज्ञायते, यौष्माकीन एव कोशो भाण्डागाराय प्रत्यर्पणीय" इति तमिमं व्यतिकरं जानन्तोऽन्ये सहृदया अभिधाय बहुधा प्रत्यपीपदन्, एवं विधामेव भाण्डागारिकमहाशयस्य प्रतायमानां सौजन्यसम्भारम् । तत्र किंचिदन्यपेक्षया स्वानुभूतचर एवैकः प्रकारः प्रदर्श्यते । इतः पराचि वर्षे कुन्तककृतवक्रोक्तिजीवितप्रतिच्छन्दाय पर्युत्सुकः स भाण्डागारिकमहाशयः इत्थं प्रत्युत्तरमन्वशात्, यथा—"गृहीतो ग्रन्थो न कस्य-चिद्दर्शनीयः संवादाय, यदि वा मुद्रणाय च । अनेन नियमेन प्रतिच्छन्दं प्राप्नुयात्" इति ।

भाण्डागारप्रकाशितप्राचीनग्रन्थनामावलीसमालोकनेन पर्युत्सुका बहवस्तत्रभवाय व्यर्थाभ्यर्थना अनासादितामिमग्रन्थावलोकना भग्नमनोरथाः प्रतिनिवर्तमाना अवगम्यन्ते स्म, यतः सोऽध्यक्षमहाशयः प्रायोऽर्धशतं प्राचीनान् सुदुर्लभान् ग्रन्थान् अनन्यावकाशं समुद्गं प्रच्छादयति स्म । विद्यमानमप्युपरितनं राजाधिकरणमविन्दानमिमं व्यतिक्रमं वैदेहिकामिव विक्रममाणं चिरादवर्तत ; यतोऽभ्यर्थिनो हताशा अपि भाण्डागारिकमहाशयस्य निरङ्कुशाधिकारतां मन्यमानास्तामिमां व्यावक्रोशीं भीता न समावेदयन्नेव लेशतोऽपि ।

---

उदारगुणसंपन्नैः भाण्डागाराधिकारिणः ।
एवं सौजन्यसीधूनाममन्दवास्सन्ति बुद्बुदाः ॥

## ॥ अत्रैव राजाधिकरणसाह्यम् ॥

तदेवं पर्यवसिते वस्तुनः सतत्त्वे प्रतिकलमुद्वेलमानायां विदुषां शृङ्गारप्रकाशप्रकाशनोत्कलिकायामस्मन्मठाधिकरणैकसाध्यतां प्रतिपाद्य प्रार्थयानेषु रहस्यवेदिषु प्रणयिषु विपश्चिद्वरेषु भाण्डागारिकव्यतिक्रमं समुद्घाटयन् अभियोगः प्रैषि राजाधिकरणमनीयत । ततः प्रवर्तितेषु यावत्सु प्रश्नप्रतिवचनलेखेषु भाण्डाकारिकानुबन्धेषु तदीयस्वच्छन्दप्रवृत्तिनिर्विण्णमुपरितनं राजाधिकरणं मठव्यवसायाय प्रीयमाणं तथा भाण्डाकारिकमन्वशात् । यथा—"अभीप्सितग्रन्थसमुपढौकनेन यतिराजमठः संविभाव्य" इति । अथ निजप्राभवप्रतीघातजातसंरम्भस्योच्चावचा भाण्डाकारिकमहाशयस्य प्रकृत्यनुगुणाः प्रवर्तिता व्यवहाराः स्वगोष्ठ्याममान्तः मैसूर् नगरेऽपि श्रूयमाणाः तत्रत्यं सरलाशयमग्र्यं सुजनमरालीचक्रुरित्यलम् । साम्प्रतमभिमतग्रन्थलाभाय निरर्गलां भाण्डागारव्यवस्थामाहितवद्राजाधिकरणं धन्यवादमर्हति ॥

## ॥ मातृकान्तरान्वेषणम् ॥

इतस्ततो मातृकान्तरप्रतिपत्त्यै लेखे प्रचारिते केरलेषु पञ्चानां महाशयानां सकाशात् अन्यतः शृङ्गारप्रकाशग्रन्थो जागर्तीत्यवगतमासीत् । ते च महीयांसः स्वस्वमातृकाकोशप्रतिच्छन्दार्पणेन प्रस्तुतमुद्यममुद्बृंहयितुमन्वजानन् ॥

१. श्रीमान् तिरुप्पुणित्तुरे भाण्डागाराध्यक्षमहाशयः,
कोचिराज्ये.

२. के. सि. वलियराजमहाशयः,
मलबार्.

३. करुणाकरमेनन् महाशयः,
मञ्जुपुरम्, कल्लिकोटे.

४. नारायणनंबूथिरि महाशयः,

तिरुप्पणतुरे समीपे ग्रामः.

५. अनंतशयनराजकीयभांडागाराध्यक्षः

एतेषु द्वितीयो महाशयः स्वीयं मातृकाकोशं कांश्चिद्दिवसानस्मासु न्यासीकृतवान् । न केवलमयं महाराजमहाशयोऽस्माकं, प्रत्युत शृङ्गारप्रकाशमास्वादयतां सहृदयानामपि संमाननीयाः पात्रमित्यनवद्यम् । एवं सङ्गृहीतेऽपि मातृकाकोशभागे खण्डत्रुटितविपर्यस्ताक्षरतया मातृकाया असममनया च प्रबन्धस्य महता श्रमेण शोधितोऽप्ययं प्रकाशः न निष्प्रत्यूहप्रकाश इति दूयमानमपि हृदयं विदग्धविद्वत्सहृदयसंविभागसंभावनया परां निर्वृतिमासादयति ।

## ॥ प्रसङ्गात्सातवाहनगाथासप्तशतीप्रस्तावः ॥

अस्मिन्प्रबन्धे प्राचां प्रबन्धेभ्यः समुद्धृत्य रमणीयानि संस्कृतपद्यानि प्राकृतगाथाश्चोदाहरणतया न्यवेशयन्त । तत्र प्राकृतगाथानां विषये निगूढं चिरात्प्रभृति किंचिदुन्मील्यते । ताश्च गाथाः सातवाहनसङ्कलितगाथाकदम्बकादेव प्रायः समाहृता दृश्यन्ते । तच्च कदम्बकं सप्तशतीति नाम्ना व्यवह्रियमाणमुपलभ्यते । अत्र बहु वक्तव्यमपि प्रसङ्गान्मनागुच्यते । अस्ति किंवदन्ती सातवाहननाम्ना राज्ञा कोट्या गाथानां मध्यात् परिमितं गाथानां कदम्बकं पृथक्सङ्कलितमिति । तच्च सप्तशतीति सङ्ख्यया तावत्परिगणितगाथमेवोपलभ्यते । एवं प्रायाश्चिच्चतुराः सप्तशतीति संज्ञाभाजः कृतयः सातवाहनीयतयैव व्यवह्रियन्ते । आसु पादशः अर्धशः संवादिन्यः गाथाः अवशिष्टाश्च विसंवादिन्य एव ॥ ततो विविक्तानां गाथानां सङ्ख्याने त्रिसहस्रतो न हीयन्ते । सप्तशतीति प्रायोवादः यद्यपि एवं सङ्घटनायाः हेतुरन्वेषणीय इति । विस्तरस्तु सप्तशतीप्रस्तावनायां पृथक्प्रपञ्चितमिति दिक् ॥

## ॥ प्रबन्धप्रतिपाद्यसङ्ग्रहः ॥

तस्यैतस्य शृङ्गारप्रकाशस्यापाततः प्रतिपाद्योपलब्धयेऽवान्तरप्रकाशानामाद्यन्तयोः प्रतिज्ञानिगमनवाक्यानि कतिचिदुद्ध्रियन्ते ॥

अस्मिन् ग्रन्थे ३६ षट्त्रिंशत्प्रकाशाः प्रतिपाद्यप्रकरणभेदेन भिन्नाः अप्यङ्गाङ्गिभावेनैकवाहितां न हापयन्ति । रसस्तु शृङ्गार एक एव । वीराद्भुतादिप्रतीतिस्तु बहुप्रकारक-कल्पेति शृङ्गप्राहिता प्रमेयस्य । विस्तरतस्तु प्रबन्धपरिशीलनमेव शरणं रमणीयमिति ।

अतोऽस्मिन्नेतावतः कवीनेव बहुमन्यामहे अभिनवेष्वपि काव्यमेवेति। तत्पुनः शब्दार्थयोः साहित्यमामनन्ति। यथा—"शब्दार्थौ सहितौ काव्यम्" इति॥ कः पुनः शब्दः? येनोच्चरितेनार्थः प्रतीयते। स च द्वादशधा—प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदं, प्रातिपदिकं, विभक्तिः, उपसर्जनं, समासः, पदम्, वाक्यम्, प्रकरणम्, प्रबन्धः इति। कोऽर्थः? यः शब्देन प्रत्याय्यते। स च द्वादशधा—क्रिया, कालः, कारकं, पुरुषः, उपाधिः, प्रधानं, उपस्कारार्थः प्रातिपदिकार्थः, विभक्त्यर्थः, वृत्त्यर्थः, पदार्थः, वाक्यार्थः इति। किं साहित्यम्? इत्यादि॥

अन्ते—

प्रकृतिप्रत्यया एवमुपस्कारश्च दर्शितः।
क्रमादुपपदस्यापि स्वरूपमुपवर्णितम्॥ १

अव्ययानि निपाताश्च गतयश्च निरूपिताः।
कर्मप्रवचनीयाश्च सोपसर्गाः प्रकाशिताः॥ २

न केवलेह प्रकृतिः प्रयुज्यते
न केवलस्सुप्तिङ्प्रत्ययादयः।
भवत्युपस्कार इहापृथग्द्वयो-
र्द्वयार्थमेवोपपदं प्रयुज्यते॥ ३

इति महाराजाधिराजश्रीभोजदेवविरचिते
शृङ्गारप्रकाशे प्रकृत्यादिप्रकाशो नाम
प्रथमः प्रकाशः॥

---

## ॥ द्वितीयः प्रकाशः ॥

आदौ प्रातिपदिकं त्रिधा विभक्तावयवं अविभक्तावयवं अनुकरणं च। तत्र विभक्तावयवं त्रिधा कृद्रूपं तद्धितरूपं समासरूपं च। तेषु भावकारकाभिधायिनो धातुप्रत्ययाः कृतः। तत्र धात्वर्थ एव पूर्वापरीभावभूतो भावः। यदाह

कालानुपाति यद्रूपं धात्वर्थस्य क्रियेति यत्।
परितो व्यवच्छिन्नं तद्भाव इति कथ्यते॥

अन्ते—

पदमिह त्रिविधं प्रतिपाद्यते
त्रिविधमेव हि वाक्यमथ त्रिधा ।
व्यवहृतिः खलु शब्दनिबन्धना
पदनयोरुभयोः प्रतितिष्ठति ॥

इति श्री प्रातिपदिकादिप्रकाशो नाम द्वितीयः प्रकाशः ॥

## ॥ तृतीयः प्रकाशः ॥

आदौ—तत्र पद्यते अनेनार्थ इति पदम् । तत्त्रिधा, क्रियारूपं, कारकरूपं, उपकारकरूपं च ॥

अन्ते—

उक्तः क्रमाद्द्वादशभेदभिन्नः
शब्दप्रपञ्चोऽयमनादिसिद्धः ।
अथार्थमूर्त्याऽस्य विवर्तमाद्य
तावत्प्रकारं प्रतिपादयामः ॥

इति श्री प्रकृत्यादिशब्दप्रकाशो नाम तृतीयः प्रकाशः ॥

## ॥ चतुर्थः प्रकाशः ॥

आदौ—तत्र प्रकृत्यादिशब्दप्रत्याय्याः क्रियाकालकारकपुरुषोपाधिप्रधानोपस्कारार्थप्रातिपदिकार्थविभक्त्यर्थवृत्त्यर्थपदार्थवाक्यार्थरूपा द्वादशभेदाः ।

अन्ते—

तेऽमी क्रिया च कालश्च कारकं पुरुषस्तथा ।
उक्ताः पदार्थाश्चत्वारः स्वैस्स्वैर्भेदैः समन्विताः ॥

द्रव्यात्मा चापि कालो यः प्रसङ्गात्सोऽपि कीर्तितः ।
स हि प्रायः प्रबन्धेषु तत्रतत्रोपयुज्यते ॥

क्रियायां कालोऽन्तर्भवति पुरुषः कारकपदे
प्रधाने सोपाधि द्वयमपि तदेतत्त्रिविधते ।
प्रधानं तं प्राहुर्यमभिदधते चक्रप्रभृतयः
महोपस्कारार्थो निवसति स तु प्रातिपदिके ॥

इति श्री क्रियाद्यर्थचतुष्टयप्रकाशो नाम चतुर्थः प्रकाशः ॥

## ॥ सप्तमः प्रकाशः ॥

आदौ — तत्राभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभावदोषहानगुणोपादानालङ्कारयोगरूपाः शब्दार्थयोर्द्वादशधर्माः समर्थास्साहित्यमित्युच्यते । तेषु शब्दस्यार्थाभिधायिनी शक्तिरभिधा । इत्यादि ।

अन्ते —

उक्तास्ततश्च प्रथमाः क्रमेण
क्रमादथान्याः प्रकटीक्रियन्ते ।
अखण्डवाक्यार्थविवेचकानां
शब्दार्थसंवित्परिशुद्धिहेतोः ॥

इति महाराज — केवलशब्दसंबन्धशक्तिप्रकाशो नाम सप्तमः प्रकाशः ॥

## ॥ अष्टमः प्रकाशः ॥

आदौ — तत्रोद्भूतसंबन्धव्यतिरेकाणां पदार्थानामितरेतरस्यान्याकाङ्क्षा व्यपेक्षा । सा च संनिहिते योग्ये च भवति । यथा—देवो वर्षति इत्यादि ।

अन्ते —

अखण्डस्सैष वाक्यार्थः शब्दब्रह्मेति गीयते ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥

उक्तास्ततोऽथ पुनश्चतस्रः
शब्दार्थसम्बन्धभिदाः क्रमेण ।
चतस्र एवाथ यथाविशेषं
निवेदयामाः परिकीर्तयामः ॥

इति महाराज — सापेक्षशब्दसामर्थ्यशक्तिप्रकाशनो नामाष्टमः प्रकाशः ॥

## ॥ नवमः प्रकाशः ॥

आदौ — तत्र या ऽभिधाविवक्षादिभिर्निरूपिते शब्दार्थयोः साहित्ये वाक्यस्य प्रयोगयोग्यता प्रयोगानर्हता च निर्धार्यते । यदाह—इत्यादि ।

अन्ते —

तदेवं दोषहानं च गुणोपादानमेव च ।
ज्ञात्वा कुर्वन्कविः काव्यं प्रेत्य चेह च नन्दति ॥

निर्दोषं गुणवद्यस्य सालङ्कारं रसान्वितम् ।
सतां वसति चेतस्सु वचः स दिवि मोदते ॥

इत्येव दोषपरिवर्जनया गुणाना-
मावर्जनेन च किलोभयथान्तरङ्गः ।
काव्ये यथायथमलङ्कृतियोग उक्त-
स्तत्रैव बाह्यमथ तं क्रमशोऽभिधास्ये ॥

इति श्रीमहाराजा … दोषहानगुणोपादानप्रकाशो नाम नवमः प्रकाशः ॥

## ॥ दशमः प्रकाशः ॥

आदौ — अथापास्तदोषस्योपात्तगुणस्य च काव्यशरीरस्य चारुत्वोत्कर्षसिद्धये प्राप्तकालोऽलङ्कारयोग उच्यते । यतः — "दीर्घापाङ्गं नयनयुगलं" इत्यादि ।

अन्ते —

अलङ्क्रिया यास्त्विह शब्दसंश्रया-
स्ततोऽर्थभूषाप्यधिकं प्रकृष्यते ।
ततोऽभिरूपामुभयोरलङ्कृतिं
वदन्ति संसृष्टिरतोऽपि शोभते ॥

इति श्री … उभयालङ्कारप्रकाशो नाम दशमः प्रकाशः ॥

## ॥ एकादशः प्रकाशः ॥

आदौ — निर्दोषस्य गुणवतोऽलङ्कारस्य च काव्यशरीरस्य कामिनीशरीरस्येव शोभातिशयनिष्पत्तौ रसादियोग एव प्रकृष्ट उपायो गीयते ।

कल्या मूर्तिः कुलममलिनं यौवनं रूपसंप-
त्सौभाग्यर्द्धिः प्रियवचनताशालिवैदग्ध्ययोगः ।
शालीनत्वं विनयपरतेत्यङ्गनाभूषणं य-
त्सप्रेमार्द्रं प्रणयिनि मनो नास्ति चेन्नास्ति किञ्चित् ॥

इत्यादि ।

इदं विनिश्चित्य निवेशयन्त

......दालं कवयो लभन्ते ॥

इति श्री + रतिप्रकाशो ? नाम त्रयोदशः प्रकाशः ॥

## ॥ चतुर्दशः प्रकाशः ॥

आदौ — मनोरथावाप्तौ मनःप्रसादो हर्षः । स च जन्मनि यथा—इत्यादि ।

अन्ते—

यदपि च गदितं प्रहर्षगामी
भवति रसो रतिविस्मयादिरेव ।
तदपि न समञ्जसं प्रकृष्टं
प्रतिनिजभेदममी हि सर्व एव ॥

इति श्री + हर्षविभावप्रकाशो नाम चतुर्दशः प्रकाशः ॥

## ॥ पञ्चदशः प्रकाशः ॥

आदौ—यदुक्तं तैः सविभावानुभावैः प्रकाशमानः शृङ्गारो विशेषतः स्वदते । तत्र प्रायेण रतिप्रीत्यै विभावादीनुदाहरन्तो (गतो) वक्ष्यामः इत्यादि ।

अन्ते —

तथातत्सर्वस्वं भुवनजयिनः पुष्पधनुषो
मनुष्याणामेकं तदिदमसमं जीवितफलम् ।
इदं तत्सौख्यानां कुलभवनमाद्यं त्रिभुवने
यदेतास्तारुण्योपहितमहिमानो मृगदृशः ॥

इति श्री + रत्यालम्बनविभावप्रकाशो नाम पञ्चदशः प्रकाशः ॥

## ॥ षोडशः प्रकाशः ॥

आदौ—इदानीमुद्दीपनविभावान्व्याख्यास्यामः । तत्र रत्यादिरुत्पन्नानुत्पन्न * * * इत्यादि ।

अन्ते –

उपनिषदुपदिष्टा सेयमुद्दीपकानां
त्रिभुवनविजयाप्तौ वैजयन्ती स्मरस्य ।
तदुपहितविशेषोद्बोधसंस्कारजन्या-
ननुपदमनुभावानेव संभावयामः ॥

इति श्री + रत्युद्दीपनप्रकाशो नाम षोडशः प्रकाशः ॥

## ॥ सप्तदशः प्रकाशः ॥

आदौ—इदानीमनुभावं (वान्) व्याख्यास्यामः । तत्र विभावैः प्रवृद्धसंस्कारस्य नायकादेर्ये स्मृतीच्छाद्वेषप्रयत्नजन्मानः वाग्बुद्धिशरीरारम्भाः तेऽनुभूयमानत्वादृत्यादीनामनन्तरभावना (न) या अनुभावाः इत्यादि ।

अन्ते—

प्रकृतिभवमतोऽभिमानसंज्ञं
समनु......पि भाववर्गः ।
स्वमवसरमुपेयिवानुपास्ते
नृपतिमिवाधिकृतोऽनुजीविवर्गः ॥

